# आदित्य-हृदय स्तोत्र | Aditya Hridaya Stotra

ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम्

रावणं चाग्रतो दृष्टवा युद्धाय समुपस्थितम् ।

दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम्

उपगम्याब्रवीद् राममगरत्यो भगवांस्तदा ।

राम राम महाबाहो श्रृणु गुह्यं सनातनम्

येन सर्वानरीन् वत्स समरे विजयिष्यसे ।

आदित्यहृदयं पुण्यं सर्वशत्रुविनाशनम् ,

जयावहं जपं नित्यमक्षयं परमं शिवम् ।

सर्वमंगलमांगल्यं सर्वपापप्रणाशनम्

चिन्ताशोकप्रशमनमायुर्वर्धनमुत्तमम् ।

रश्मिमन्तं समुद्यन्तं देवासुरनमस्कृतम् ,

पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरम् ।

सर्वदेवतामको ह्येष तेजस्वी रश्मिभावनः

एष देवासुरगणाँल्लोकान् पाति गभस्तिभिः ।

एष ब्रह्मा च विष्णुश्च शिवः स्कन्दः प्रजापतिः

महेन्द्रो धनदः कालो यमः सोमो ह्यपां पतिः ।

पितरो वसवः साध्या अश्विनौ मरुतो मनुः

वायुर्वन्हिः प्रजाः प्राण ऋतुकर्ता प्रभाकरः ।

आदित्यः सविता सूर्यः खगः पूषा गर्भास्तिमान्

सुवर्णसदृशो भानुहिरण्यरेता दिवाकरः ।

हरिदश्वः सहस्रार्चिः सप्तसप्तिर्मरीचिमान्

तिमिरोन्मथनः शम्भूस्त्ष्टा मार्तण्डकोंऽशुमान् ।

हिरण्यगर्भः शिशिरस्तपनोऽहरकरो रविः

अग्निगर्भोऽदितेः पुत्रः शंखः शिशिरनाशनः ।

व्योमनाथस्तमोभेदी ऋग्यजुःसामपारगः

घनवृष्टिरपां मित्रो विन्ध्यवीथीप्लवंगमः ।

आतपी मण्डली मृत्युः पिंगलः सर्वतापनः

कविर्विश्वो महातेजा रक्तः सर्वभवोदभवः ।

नक्षत्रग्रहताराणामधिपो विश्वभावनः

तेजसामपि तेजस्वी द्वादशात्मन् नमोऽस्तु ते ।

नमः पूर्वाय गिरये पश्चिमायाद्रये नमः

ज्योतिर्गणानां पतये दिनाधिपतये नमः ।

जयाय जयभद्राय हर्यश्वाय नमो नमः

नमो नमः सहस्रांशो आदित्याय नमो नमः ।

नम उग्राय वीराय सारंगाय नमो नमः

नमः पद्मप्रबोधाय प्रचण्डाय नमोऽस्तु ते ।

ब्रह्मेशानाच्युतेशाय सूरायदित्यवर्चसे

भास्वते सर्वभक्षाय रौद्राय वपुषे नमः ।

तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने

कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः ।

तप्तचामीकराभाय हरये विश्वकर्मणे

नमस्तमोऽभिनिघ्नाय रुचये लोकसाक्षिणे ।

नाशयत्येष वै भूतं तमेव सृजति प्रभुः

पायत्येष तपत्येष वर्षत्येष गभस्तिभिः ।

एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः
एष चैवाग्निहोत्रं च फलं चैवाग्निहोत्रिणाम् ।

देवाश्च क्रतवश्चैव क्रतूनां फलमेव च
यानि कृत्यानि लोकेषु सर्वेषु परमप्रभुः ।

एनमापत्सु कृच्छ्रेषु कान्तारेषु भयेषु च ।
कीर्तयन् पुरुषः कश्चिन्नावसीदति राघव ।

पूजयस्वैनमेकाग्रो देवदेवं जगत्पतिम्
एतत् त्रिगुणितं जप्तवा युद्धेषु विजयिष्ति ।

अस्मिन् क्षणे महाबाहो रावणं त्वं जहिष्यसि
एवमुक्त्वा ततोऽगस्त्यो जगाम स यथागतम् ।

एतच्छ्रुत्वा महातेजा, नष्टशोकोऽभवत् तदा
धारयामास सुप्रीतो राघवः प्रयतात्मवान् ।

आदित्यं प्रेक्ष्य जप्त्वेदं परं हर्षमवाप्तवान्
त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान् ।

रावणं प्रेक्ष्य हृष्टात्मा जयार्थे समुपागमत्
सर्वयत्नेन महता वृतस्तस्य वधेऽभवत् ।

अथ रविरवदन्निरीक्ष्य रामं मुदितनाः परमं प्रहृष्यमाणः

निशिचरपतिसंक्षयं विदित्वा सुरगणमध्यगतो वचस्त्वरेति ।